# POSITIVE TALK

ISSN 2582-6247 MULTIDISCIPLINARY, PEER-REVIEWED (REFEREED) JOURNAL

## MULTILINGUAL INTERNATIONAL CONFERENCE

**25-26 September 2023**

భారతీయ సాహిత్యం - ఆధ్యాత్మికత | भारतीय साहित्य - आध्यात्मिकता

भारतीय साहित्ये - आध्यात्मिकता | Indian Literature - Spirituality

Executive Editor
**Dr. P.K. Jayalakshmi**

Editor
**Krishnakant**



**St. Joseph's College for Women (A)**
Visakhapatnam 530 004 AP INDIA
REACCREDITED BY NAAC & ISO 9001 : 2015, 14001 : 2015 CERTIFIED

"Don't prove yourself, Just improve yourself."

# International Multilingual Conference

25-26 September 2023

**భారతీయ సాహిత్యం - ఆధ్యాత్మికత | भारतीय साहित्य - आध्यात्मिकता**

**भारतीय साहित्ये - आध्यात्मिकता | Indian Literature - Spirituality**

**Chief Patron**

Dr. Sr. Shyji P. D.

**Convener**

Dr. P. K. Jayalakshmi

**Organised by**

Department of Languages

St. Joseph's College for Women (Autonomous)

Visakhapatnam . A.P

# अनुक्रमणिका


34. महाभारतान्तर्गतानि मानवमूल्यानि 103-105
वी. पावनी

35. भगवद्गीतासु श्रद्धात्रयविभागयोगे छात्राणां कृते मानसिक वर्धनोपाया: 106-107
डॉ. ओ. रामाराव:

36. वैखानसागमस्य ज्ञानमार्ग स्वरूपम् 108-109
डॉ. आर. अरुणा देवी

37. अष्टादश पुराणेपु आध्यात्मिक तत्त्व विचार: 110-112
डॉ. के. काशीविश्वेश्वर शर्मा

38. आध्यात्मिकसाहित्ये मानवीयमूल्यानि 113-114
डॉ. अन्नदानं हनुमत्प्रसाद:

39. उपनिपत्सु मानवीयमूल्यानि 115-116
डॉ. आशावादी सुधाम वंशी

40. आध्यात्मिकतत्त्वे अन्नदान, तप, दानानां माहात्म्यम् 117-120
डॉ. यम्. रामचन्द्रराव:

41. भगवद्गीता-भक्तियोगविचार: 121-122
वारणासि वेङ्कटेश्वर शर्मा

42. भगवद्गीतायां आध्यात्मिकमानवीयमूल्यानि 123-124
यस. सत्यनारायण:,/डॉ. पि. उमामहेश्वरराव:,

43. जैन सिद्धान्तसार निरूपणे जीवन्धरचम्पूकाव्ययोगदानम् 125-127
डॉ.जी. वीरब्रह्मम

44. प्राचीनकाले मानवमूल्यानि 128-130
टी. शिवरामकृष्ण:

45. भारतीयसंस्कृतौ मूल्यानि 131-132
डॉ. वि.वेङ्कट लक्ष्मीनारायण:

46. పాల్కురికి సోమనాథుడు - శైవ భక్తి తత్వం 133-136
డా. జూరెడ్డి నిర్మల

47. పోతన ఆంధ్ర మహా భాగవతం - ఆదర్శ వ్యక్తిత్వం 137-139
డా. ఒబిన్ని శ్రీహరి

48. వాల్మీకి రామాయణం - సీత స్వరూప స్వభావం 140-143
వాదులపల్లి పిరోజ

49. మానవుడు - ఆధ్యాత్మికత 144-147
బండా వేంకట కృష్ణ శక్తిధర్

50. ఆంధ్ర మహాభారతం - వ్యక్తిత్వ వికాసం 148-150
డా. పి. జయచంద్రుడు

ISSN 2582-6247 POSITIVE TALK

# वैखानसागमस्य ज्ञानमार्ग स्वरूपम्

**डा. आर. अरुणा देवि.**
ए.एस.डी. वूमेंस (ए) डिग्री कॉलेज, काकीनाडा

श्रीमन्नारायणस्य मुखारविन्दात् उच्छासनिश्वास रूपेण विनिस्मृताः वेदाः। एते ज्ञान सुधसिन्धवः आत्मोपदेशाः, अपौरूपेयाः, संस्कृति संरक्षणस्य निदानभूताश्च भवन्तीति निश्चप्रचोअद्वयं विपयः। महतो विशलस्य वेदवृक्षस्य शाखासदृशानि यानि सन्ति तानि शिक्षा व्याकरणादीनि पशास्त्रानि इति, सुगन्ध संयुक्तानि पुष्पाणि यानि सन्ति तानि आगमशास्त्राणि भवन्तीति आध्यात्मिक विद्वद्भिश्च मन्यते ।

पुष्पसदृशेपु आगम ग्रन्थेपु तत् सौगन्ध्यमस्ति तत् स्वीकृत्य आध्यात्मिक सुगन्ध सम्भरित तत्वयुक्ताः, आर्पसंस्कृति संम्प्रदाय परिरक्षकाः आस्तिकाः भवन्तु इतिथिया महर्षिभिः तत् आगमशास्त्रं सांडोपाङुम् उपदिश्यते।

शास्त्राणि वहूनि विलसन्त्यपि अन्तिम पुरुपार्थं मोक्षं साधयितुम् अन्यान् च प्रापयितुं आगमशास्त्रमेव प्रधानसाधनं भवतीति भारतीय दार्शनिकानां सिद्धान्तो वर्तते।

निराकारस्य भगवतः यथेष्टे द्रव्ये साकारं परिकल्पय तं मन्दिरे संस्थाप्य आवाह्वानादिकं कृत्वा अर्घ्यपाद्य आचमनादिभिस्सम्पूज्य भक्तः सर्वाभीष्टानि साधयितुं आगमशास्त्रमेव मूलमिति च आगमिकानांविश्वासः।

अस्य आगमशास्त्रस्य धर्म-वास्तुशिल्प-मन्त्र तन्त्र रेखा योग नृत्त नाट्य वाद्य सङ्गीत -ज्योतिष -आयुर्वेदा: शास्त्राणि अङ्गभूतानि भवन्तीति सवैषां शास्त्राणं आचरणे आ- शास्त्रस्य आवश्यकता अस्माभिः निर्देष्टु नैव शक्यते इति विद्वद्भिः सूच्यते ।

दक्षिण भारते विद्यमानेपु प्रसिद्धाप्रसिद्धेपु आलयेषु प्रधानतया वैष्णव शैव शाक्तागमाः एव उत्सवाद्यार्चनानुष्ठान- विद्योतन्ते। अचिन्त्यः, अप्रमेयः दिव्य अद्भुत नित्य निरवद्य सौगन्ध्य - सौकुमार्य योवनाद्यनन्त कल्याणगुण विशिष्टः सकल जगज्जन्मस्थितेध्वंसानां मूलकर्ता, ज्ञेयः, सर्वत्रव्याप विश्वव्यापकः, दृश्यः अदृश्यः अमलः नित्यः सनातन अणोरणीयान् महतो महीयान्, नित्यानन्दमयः अमृत पानवत्सर्वदा तृप्तिकरः, तस्य स्थानं सूरयः सदापश्यन्तीति श्रीमन्नारायणस्य वैशिष्टयं निरूप्य तस्य प्राप्तिरेव मोक्ष इत्युपदिश्य, तस्य प्राप्तेः जप होम अर्चन ध्यानानीति चतुर्विध पूजामार्गाणि निर्धारितानि भवन्तीति अन्यथा प्राप्तुं नैवशक्य इति, तस्य परमात्मनः विष्णोः मन्दिर निर्माण विग्रहकल्पन विग्रह प्रतिष्ठ अर्चन स्नपन उत्सव प्रायश्चित्तादि नैकविधानामंशाना - उपदेशरूपेणा वैष्णवागमः राराजते।

असे चागमः द्वेधा विभक्तिः वैखानस पञ्चरात्र इति

इमौ द्वौ वैष्णवागमौ विष्णवालयेषु भारते लब्धप्रतिष्ठौ स्तः । वैखानसागमः विखनोमुनिरारभ्य भृगवादिशिष्येभ्यः अद्ययावत् विशिष्टं स्थानं स ग्रन्थः व्याख्याविवरणात्मकैः बृहद्रूपेण रराजते इति सुप्रसिद्धोऽयं विषयः

भृगु मरीचि अत्रि कश्यपाः ऋष्यः ...

भृगु महर्षिः त्रिकाल ज्ञान सम्पन्नः धर्मस्वरूपः ऋग्वेदरूपश्च । मरीचि महर्षिः ज्ञाननिधिः अर्थस्वरूपः यजुर्वेदरूपश्च । अत्रि महर्षि ज्ञानानुष्ठान सम्पन्नः सामवेदरूपः कामहन्ता च काश्यप महर्षि यज्ञनिधिः सर्ववेत्ता मोक्षस्वरूपः अथर्वण वेदस्वरूपश्च भवति । एते तावत् विखनस मुनिशिषयाः भवन्ति ।

चतुर्षु शिष्येषु एकैकः एकस्य वेदस्वरूपः चतुर्विध पुरुषार्थेषु एकस्य पुरुषार्थस्य प्रतिनिधिरूपः इति वक्तुं नैव संशीतिलेशः । अतः वैखानसागमः शब्दप्रमाणमात्रः विष्णोः परम पदमार्गमुपदेशस्वरूपः उत्तम ब्रह्मविद्या च भवति।

वैखानसागमे क्रियामार्ग : क्रिया नाम भगवदर्चनम्। अत्र आलयनिर्माणात् विग्रहकल्पन पर्यन्तमावश्यकाः भारतीय वास्तु शास्त्रीयाः शिल्पशास्त्रीयाश्च अंशाः सर्वेऽपि प्रतिपादिताः सन्ति ताः क्रियाः तावत् भूपरीक्षा कर्षणं बीजवापनं गोगणनिवेदनं प्रथमशिलेष्टकान्यासः गर्भन्यासः विमान निर्माणं मूर्वेष्टकान्यासः परिवारालय निर्माणं शिलासङ्ग्रहणं ध्रुवादि पञ्चबेरणां कल्पनमित्येते अंशाः सुष्ठु उपदिश्यन्ते । सर्वोऽपि वैखानसागम ग्रन्थेषु क्रियामार्गनेपथ्ये सविवरणमुपदिश्यन्ते ।

वैखानसगमे योगः योगः नाम चित्तवृत्तिनिरोधः इति योगसूत्रे पतञ्जलिना निर्दिष्टः। जीवात्म परमात्मनोः योगो योगः इति योगशब्दस्य निर्वचनं वैखानसागमे वर्णितम्। तत्र योगसूत्रवाक्यात् वैखानसागम वाक्यमेव भगवत्तत्वान्वेषणस्य मार्गं सूच्यते । तदेव अत्र सुष्टुत उपदिष्टम् ।

योगविषये अस्मिन् यौगिक क्रिया सम्बद्धा : अष्टौ योगाङ्ग विषया प्रतिपादिताः सन्ति। ते ताक्त यम-नियम आसन प्राणायामप्रत्याहार ध्यान धारण समाधयः इति । अष्टविधयोगाड विषयः तस्य भेदाश्च वर्णिताः दृश्यन्ते अत्र अत्र तावत् भगवदाराधनात्पूर्वं आराधकस्यात्मङ्ग शोधनं शरीरशुद्धिः आध्यात्मिकतत्वज्ञानसम्पादनं मालिन्यनिवृत्तिश्च अनिवार्यरूपेण निर्दिश्यते। अत्र चित्तवृत्ति निरोधकयोगः भगवदाराधने प्रधानतमः अंश इति ज्ञायते ।

ज्ञानमार्ग : परमात्मनः श्रीमन्नारायणस्य तत्वं ज्ञानम् ।

परमात्मा ज्ञेयः जीवात्मा ज्ञाता श्रुतयः त्रयसारः। क्षीरे सर्पिखि तिले तैलमिव पुष्पे गन्ध इव फले रसः इव काष्ठे अि श्रीमन्नारायणः अणोरणीयान् महतो महीयानिव अन्तर्बहिश्च तत्सर्वं व्याप्य प्रतिभाति । स च परमात्मा सगुण निर्गुणश्च । परमात्मा दृश्यः अदस्यः अन्यच्छः निर्विकल्पः निर्तिः अनिर्वचनः अतीन्द्रियःसुसुक्ष्मत्वादनिर्वेश्या सदसदिति च तस्य विशिष्टस्य परमात्मनः तव सन्दर्शनमेव वैखानसशास्त्रज्ञानमिच्यते। परमात्मा विष्णुःवैखानसागमें ज्ञानमार्ग

परमात्मनः श्रीमन्नारायणस्य तत्वं ज्ञानम् ।

परमात्मा ज्ञेयः जीवात्मा ज्ञाता श्रुतयः ज्ञानमिति तत्व त्रयसारः। क्षीरे सर्पिखि तिले तैलमिव पुष्पे गन्ध इव फले रसः इव काष्ठे अग्निश्च परमात्मा श्रीमन्नारायणः अणोरणीयान् महतो महीयानिव अन्तर्बहिश्च तत्सर्वं व्याप्य प्रतिभाति। स च परमात्मा सगुणः निर्गुणश्च । परमात्मा दृश्यः अदृश्यः अत्यच्छः निर्विकल्पः निद्विद्वः अनिर्वचनः अतीन्द्रियः सुसूक्ष्मत्वा-दनिर्देश्यः सदसदिति च ।

तस्य विशिष्टस्य परमात्मनः तत्व सन्दर्शनमेव वैखानसशास्त्रोक्तज्ञानमित्युच्यते । परमात्मा विष्णुः महाविष्णुः सदाविष्णुः व्यापिनारायण इति तत्रापि आमोदे विष्णुः सदाविष्णुः व्यापिनारायण इति तत्रापि आमोदे विष्णुः प्रमोदे महाविष्णुः सम्मोदे सदाविष्णुः वैकुण्ठे व्यापिनारायणः विराजन्ति ।

नित्यानन्दमृतरसपानवत् सर्वदा तृप्तिकरं नित्यनिषेवणं पुनरावृत्तिरहितं शाश्वतमतीन्द्रियं देवैरप्यनभिलक्ष्यंतद्विष्णोः परमं पदमिति विष्णोस्स्थानं विशिष्टतया वैखानसागमे उपवर्ण्यते। स एव मोक्ष इति य उच्यते। एतादृशस्य अस्य परमात्मनः स्थान-रूप-लक्षणावगमन मेव ज्ञानं भवति। अस्य ज्ञानस्य स्वरूपं सुस्पष्टं साङ्गोपाङ्ग सविशदं विव्रियते वैखानसागमे।

उपसंहार

भकत्या भगवन्तं श्रीमन्नारायणं तत्वं स्वरूपं विज्ञाय अस्माकमल्पाज्ञानां जीवानां स्थितिः ईदृशी।

इति ज्ञात्वा धर्ममार्गेणध्यत्मिकचिन्तनेन निर्दिष्टः

कर्मभिरूपदिष्टः क्रियाविशेषश्च पवित्रत्वं आध्यात्मिकोनतत्वं च संसाध्य मोक्षः सर्वः साधनीय इति ज्ञानमार्गस्योपदेश सारः।

शोधग्रन्थः

अत्रि प्रोक्तस्य समूतार्चनाधिकरणस्य समीक्षात्मकम ध्ययनम्।